## नोपधात् थफान्ताद्वा। (२३/३३२४)

निष्ठा इति निवृत्तम्। नकारोपधाद् धातोः थकारान्तात् फकारान्ताच् च [1]परः क्त्वा प्रत्ययः सेड् वा न किद् भवति। [2]ग्रथित्वा, ग्रन्थित्वा। श्रथित्वा, [3]श्रन्थित्वा। गुफित्वा, [4]गुम्फित्वा। नोपधात् इति किम्? [5]रेफित्वा। [6]गोफित्वा। थफान्तात् इति किम्? [7]स्रंसित्वा। ध्वंसित्वा॥

## वञ्चिलुञ्च्यृतश्च। (२४/३३२५)

वञ्चि लुञ्चि ऋत् इत्येतेभ्यः परः क्त्वा प्रत्ययः सेड् वा न किद् भवति। [8]वचित्वा, वञ्चित्वा। [9]लुचित्वा, लुञ्चित्वा। ऋतित्वा, [10]अर्तित्वा। ऋतेरीयङ् (३.१.२९/२४२२) आर्धधातुके विकल्पितः (३.१.३१/२३०५)। स यत्र पक्षे नास्ति तत्रेदमुदाहरणम्। सेट् इत्येव। वक्त्वा॥

## तृषिमृषिकृशेः काश्यपस्य। (२५/३३२६)

'न क्त्वा सेट्' (१.२.१८/३३२२) इति प्रतिषेधे प्राप्ते कित्त्वं विकल्प्यते। तृषि मृषि कृशि इत्येतेभ्यः परः क्त्वा प्रत्ययः सेट् काश्यपस्याचार्यस्य [11]मते वा न किद् भवति। तृषित्वा, तर्षित्वा। मृषित्वा, मर्षित्वा। कृशित्वा, कर्शित्वा। काश्यपग्रहणं पूजार्थम्। वा इत्येव हि वर्तते (म. भा. १.२०१)॥

## रलो व्युपधाद्धलादेः संश्च। (२६/२६१७)

वा इति वर्तते सेट् इति च। उश्च इश्च वी। [12]वी उपधे यस्य स व्युपधः। उकारोपधादिकारोपधाच् च धातो रलन्ताद्धलादेः परः संश्च क्त्वा च सेटौ वा [13]कितौ भवतः। द्युतित्वा, द्योतित्वा। [14]दिद्युतिषते, दिद्योतिषते[15]। लिखित्वा, लेखित्वा। लिलिखिषति, लिलेखिषति। [16]रलः इति किम्? देवित्वा, दिदेविषति। व्युपधात् इति किम्? वर्तित्वा, विवर्तिषते। हलादेः इति किम्? एषित्वा, [17]एषिषिषति। सेट् इत्येव। भुक्त्वा, [18]बुभुक्षते॥

## ऊकालोऽज्झ्रस्वदीर्घप्लुतः। (२७/४)

ऊ इति [19]त्रयाणामयं 'मात्रिक-द्विमात्रिक-त्रिमात्रिकाणां [20]प्रश्लिष्टनिर्देशः' (तै.प्रा. १.३१)। ह्रस्वदीर्घप्लुतः इति द्वन्द्वैकवद्[21]भावे पुंल्लिङ्गनिर्देशः। [22]उ ऊ ऊ३ [23]इत्येवंकालो अज् यथाक्रमं ह्रस्वदीर्घप्लुतः इत्येवंसञ्ज्ञो भवति। उकालो ह्रस्वः–दधि। मधु। ऊकालो दीर्घः–कुमारी। गौरी। ऊ३कालः प्लुतः–देवदत्त३ [24]अत्र न्वसि। कालग्रहणं परिमाणार्थम्। दीर्घप्लुतयोः ह्रस्वसञ्ज्ञा मा भूत्। आलूय, प्रलूय, 'ह्रस्वस्य [25]पिति कृति तुक्' (६.१.७१/२८५८) इति

---

1. परतः क. 2. ग्रहीत्वा ग. 3. श्रन्थित्वा नास्ति फ. 4. गुम्फित्वा नास्ति फ. 5. रिफित्वा ब, नास्ति ग.ह. 6. नास्ति अ.क.फ.ग.ह. 7. श्रंसित्वा अ. 8. चित्वा ह. 9. लुचित्वा नास्ति क. 10. अत्रित्वा ब. 11. मतेन अ.क.ड.फ.ह. 12. ते उपधे अ.क.ह, इत्येतौ उपधे फ, तौ उपधे ग. 13. न इत्यधिकम् ड. 14. विदिद्युषते ह, विदिद्योतिषते फ. ह. 15. द्युति च व्योः संप्रसारणम् इत्यधिकम् फ. 16. रेलः क. 17. एषिषति क. ह. 18. बभक्षते क. 19. त्रयाणां वर्णानाम् फ, त्रयाणामेष ड, त्रयाणामेक अ. क. ह. 20. प्रश्लेषनिर्देशः अ. ब. क, प्रश्लेषः ड, प्रश्लिष्टनिर्देशः क्रियते ग. 21. भावपक्षे फ. 22. उऊऊभ्यः ग. 23. एवंकाला अचः यथाक्रमं ह्रस्वदीर्घप्लुतसञ्ज्ञा भवन्ति फ. ग. ह, यथाक्रमेण ह. 24. अत्रासि ड.फ.ग, अत्र त्वमसि ह, अत्र वसि ब. 25. पिति कृति तुक् नास्ति ड. फ. ग.